वक्षः पातु यमभ्राता, कुक्षिं पात्वसितस्तथा॥5॥
नाभिं ग्रहपतिः पातु, मंद पातु कटि तथा।
उरू ममांतकः पातु, यमो जानुयुंग तथा॥6॥
पादौ मन्द गतिः पातु, सर्वांग पातु पिप्पलः।
अंगोपांगानि सर्वाणि, रक्षेत् मे सूर्यनन्दनः॥7॥

॥ फलश्रुति ॥

इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः।
न तस्य जायते पीडा प्रीतो भवति सूर्यजः॥1॥
व्यय जन्म द्वितीयस्थो मृत्युस्थान गतोऽति वा।
कालस्थ गतो वाऽपि सुप्रीतस्तु सदा शनिः॥2॥
अष्टमस्थे सूर्यसुते व्यये जन्म द्वितीयगे।
कवचं पठतो नित्यं न पीडा जायते क्वचित्॥3॥
इत्येतत् कवचं दिव्यं, सौरेर्यन्निर्मितं पुरा।
द्वादशाष्टम् जन्मस्थ, दोषान्नाशयते सदा।
जन्मलग्नस्थितान् दोषान् सर्वान् नाशयते प्रभु॥4॥

॥ श्रीब्रह्माण्ड पुराणे श्री शनिवज्र पञ्जर कवचं सम्पूर्णम् ॥

शनि तंत्रोक्त साधना

विनियोग– ॐ अस्य श्री शनि मंत्रस्य ब्रह्मा ऋषि गायत्री छन्द: शनैश्चर देवता शं बीजं आप शक्ति श्री शनैश्चर प्रीत्यर्थे पाठे जपे विनियोग।

ऋष्यादिन्यास–

ॐ ब्रह्म ऋषये नम: सिरशि, ॐ गायत्री छन्दसे नम: मुखे, ॐ शं शनैश्चर देवतायै नम: हृदय, ॐ शं बीजाय नम: गुह्ये, ॐ आप शक्तये नम: पादयो।

करान्यास–

ॐ शं अंगुष्ठाभ्यां नमः। ॐ शं तर्जनीभ्यां नमः। ॐ शं मध्यमाभ्यां नमः। ॐ शं कनिष्ठकाभ्यां नमः। ॐ शं करतलपृष्ठाभ्यां नमः।।

हृदयादिन्यास–

ॐ शं हृदयाय नमः। ॐ शं शिरसि स्वाहा। ॐ शं शिखायै वषट्। ॐ शं कवचाय हुं। ॐ शं नेत्रत्रयाय वौषट। ॐ शं अस्त्राय फट्।

ध्यान मंत्र–

सूर्यसुतं महेश अंशं मातु छाया नन्दनम्।
कालरूपं कृष्णवर्णं मन्दगते तव वन्दनम्।।

मंत्र – ॐ शं शनैश्चराय नमः।

तंत्रसार में वर्णित इस मंत्र का 7,11,21,31,51 माला रोज करने से शनिदेव अनुकूल फल प्रदान करते हैं। यदि इस मंत्र के एक करोड़ जप कर लिये जाएं या किसी योग्य ब्राह्मण से कराये जाएं तो व्यापारिक, शारीरिक व कानूनी समस्या से तुरंत राहत मिलती है।

वैदिक शनि साधना

यह साधना शनिवार को पड़ने वाले किसी शुभ मुहूर्त में शास्त्रोक्त विधि से संकल्प लेकर प्रारंभ की जाती है। इसमें नीचे लिखे मंत्र का जाप 21 दिनों तक करना पड़ता है। इस साधना में शनि यंत्र, पहनने के लिये काले वस्त्र, बैठने के लिए काले ऊन का आसन, चौकी या पटरा, शनि यंत्र हेतु काला वस्त्र, तेल का दीपक, रुद्राक्ष की माला और शमी पुष्प व आक पुष्प या काला गुलाब उपयोग में लायें।

मंत्र

ॐ शन्नौ देविरभिष्टयऽआपो भवंतु पीतये। शंयोरभि स्रवंतु नः।

विनियोग– **शन्नोदेवीरिति मंत्रस्य दध्यङडाथर्वण ऋषि गायत्री छन्दः। शनिर्देवता। आपो बीजम्। वर्तमान इति शक्तिः। शनैश्चरप्रीत्यर्थे जपे विनियोगः।।**

ऋष्यादि न्यास– **ॐ दध्यङडाथर्वणऋषये नमः शिरसि।।१।। ॐ गायत्रीछंदसे नमः मुखे।।२।। ॐ शनैश्चरदेवतायै नमः हृदये।।३।। ॐ आपोबीजाय नमः गुह्ये।।४।। ॐ वर्तमानशक्तये नमः पाद्यो।।५।। विनियोगाय नमः सर्वाङ्गे। इति ऋष्यादिन्यासः।**

करन्यास– **ॐ शन्नोदेवीरित्यङ्गुष्ठाभ्यां नमः।।१।। ॐ अभिष्टये तर्जनीभयां नमः।।२।। ॐ आपोभवंतु मध्यमाभ्यां नमः।।३।। ॐ पीतये अनामिकाभ्यां नमः।।४।। ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः।।५।। ॐ अभिस्त्रवंतुनः करतल पृष्ठाभ्यां नमः।।६।। इति करन्यासः।**

हृदयादिन्यास– **ॐ शन्नोदेवीरिति हृदयाय नमः।।१।। ॐ**

अभिष्टये शिरसे स्वाहा॥२॥ ॐ आपो भवन्तु शिखायै वषट्॥३॥ ॐ पीतये कवचाय हुं॥४॥ ॐ शंय्योरिति नेत्रत्रयाय वौषट्॥५॥ ॐ अभिस्त्रवंतुनः अस्त्राय फट्॥६॥
मंत्रन्यास– **ॐ शन्न इति शिरसि॥१॥ ॐ देवीरिति ललाटे॥२॥ ॐ अभिष्टये मुखे॥३॥ ॐ आपो हृदये॥४॥ ॐ भवन्तु नाभौ॥५॥ ॐ पीतये कट्याम॥६॥ ॐ शंय्योरूर्वोः॥७॥ ॐ अभिस्त्रवन्तु जानुनोः॥८॥ ॐ पादयोः॥९॥ इति मंत्रन्यासः॥**

ध्यान

नीलद्युतिः शूलधरः किरीटी गजस्थितस्त्रासकरो धनुष्मान्। चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरदो शनैश्चरा॥

शनिग्रह की शांति हेतु की जाने वाली इस साधना का प्रारंभ शनिवार को करना चाहिए और शनिवार से प्रारंभ करें और प्रतिदिन 21 माला का जाप अवश्य करना चाहिए। एक बात का विशेष ध्यान रखें कि जितनी माला पहले दिन हुई है, उतनी ही माला का जाप 21 दिन तक होना चाहिए, माला का क्रम न तोड़ें। इस बीच शनि से संबंधित वस्तुओं का नियमित दान भी आवश्यक है। जितने दिनों तक साधना चले, साधक को नियमपूर्वक यम, नियमादि का पालन करते हुए ब्रह्मचर्य रहना चाहिए। साधना के दौरान तामसी भोजन का परित्याग आवश्यक है।

साधना के पहले दिन साधक को शनिदेव के यंत्र को चौकी या पटरे पर काला वस्त्र बिछाकर स्थापित करना चाहिए और स्वयं स्नानोपरांत पवित्र होकर काले वस्त्र धारण कर काले ऊन के आसन पर बैठकर श्री गणेश प्रार्थना करने के बाद साधना का संकल्प लेना चाहिए। शनि यंत्र के पास तेल का दीपक व धूप प्रज्ज्वलित करते

हुए शनि प्रतिमा व शनि यंत्र या शनि चित्र का ध्यान करने के पश्चात् उपरोक्त मंत्र का जाप प्रारंभ करना चाहिए। शनि यंत्र को हमेशा किसी लौह पात्र में स्थापित करना चाहिए। मंत्र जाप करते समय अपनी दृष्टि शनि यंत्र, शनि प्रतिमा या शनि चित्र पर केन्द्रित रखनी चाहिए और यथाशक्ति उसे एकटक देखते रहना चाहिए। यदि आँसू बहने लगे तो कुछ देर आँखों को बंद किया जा सकता है। किंतु उस समय भी मन से शनि यंत्र, शनि प्रतिमा या शनि चित्र का ध्यान अवश्य करना चाहिए। नित्य प्रति 21 माला जाप करने के बाद शनि यंत्र पर सरसों का तेल चढ़ाकर आसन से उठ जाना चाहिए। किंतु ध्यान रहे, जब तक साधना चले, तब तक शयन भी उसी कक्ष में करें, जहाँ साधना की जा रही है।

साधना के दौरान संभव है शनिदेव भय उत्पन्न करते हैं, लेकिन किसी भी स्थिति में भयभीत होकर मंत्रजाप न रोकें। बीच में ही साधना से उठ जाने पर भारी अनिष्ट होने की संभावना रहती है। नित्य प्रति की जाने वाली साधना में माला समाप्ति के बाद हवन, मार्जन, तर्पण के बाद चावल व काले उड़द को पकाकर शनिदेव को भोग अवश्य लगायें।

साधना के अंतिम दिन जितने अभी तक मंत्र हुए हैं, उनका दशांश हवन, मार्जन व तर्पण भी करें। हवन के दौरान साधक को शनिदेव का दर्शन भी हो जाया करता है। ध्यान रहे, यदि दर्शन न भी हों तो भी उक्त साधना निष्फल नहीं जाती। साधक को इसका फल अवश्य मिलता है। इस वैदिक साधना से उक्त शनि मंत्र सिद्ध हो जाता है, जिससे अपने कल्याण के साथ दूसरों का भी कल्याण बड़ी आसानी से किया जा सकता है।

यदि कोई व्यक्ति उक्त मंत्र इस वैदिक विधि से सिद्ध कर लेता है तो उसकी सभी ग्रह बाधाएँ दूर हो जाती हैं। शत्रु-भय से छुटकारा पाने के लिए उक्त मंत्र की 21 माला जाप पर्याप्त रहता है। किसी यात्रा की सफलता हेतु उक्त शनिमंत्र का 11 या 21 बार जाप पर्याप्त है। यदि ऐसा लगे कि कोई प्रिय कार्य सम्पन्न होने में बाधाएँ आ सकती हैं तो बाधा निवारण के लिए उक्त मंत्र का 108 बार जाप आवश्यक है। साथ ही, रोज सोने के पहले मंत्र का यथाशक्ति मानसिक जाप करना भी बहुत कारगर सिद्ध होता है। मंत्र के जाप से मन:स्थिति तुरन्त ठीक हो जाती है। यदि किसी के कारोबार में समस्या आ रही हो तो इस मंत्र का मध्य रात्रि में स्थान पवित्र करके तेल का दीपक जलाकर 21 दिन तक प्रतिदिन पाँच माला जाप करने से कैसी भी कारोबारी समस्या ठीक हो जाती है।

अथ दानद्रव्याणि

माषांश्च तैलं विमलेन्द्रनीलं तिलाः कुलित्था महिषी च लोहम्।
कृष्णा च धेनुः प्रवदन्ति नूनं दृष्टाय दानं रविनंदनाय॥

शनिदेव बलकारी, गिद्ध तेरी है सवारी।
रूप चतुर्भुज धारी, अति ही विशाल है।
सूर्यदेव पिता तेरे छाया तेरी महतारी।
महिमादेवों में न्यारी करते निहाल हैं।
तेल अभिषेक करें, लौह प्रतिमा पे थारी।
मोदक चढ़ावें, चढ़ें उड़द की दाल है।
भगतन हितकारी, सुमिरत नर-नारी।
नीलाम्बर धारी 'मनु', कालों के भी काल हैं।

तंत्रोक्त शनि साधना

तंत्रोक्त साधना में काले तिल, काले वस्त्र, काले ऊन के आसन, मूंगे की माला, धूप, दीप, शनियंत्र, काले रंग में रंगे सरसों तेल में भीगे अक्षत (चावल) और काले उड़द की जरूरत पड़ती है। साधना का स्थान एकांत में अवस्थित नदी किनारे या गंगा-यमुना किसी पुराने पीपल के पेड़ के नीचे होना चाहिए। यदि पीपल किसी शमशान में हो तो और बेहतर है। इस साधना में प्रयुक्त होने वाला तांत्रिक मंत्र इस प्रकार है- **'ॐ प्रां प्रीं प्रौं सः शनैश्चराय नमः।'**

यह साधना करने के लिए साधक को स्नानोपरांत काले वस्त्र पहनकर गणेश आराधन व गुरू पूजन करना चाहिए, तदोपरांत शनि से प्रार्थना करें। हे शनि आप मुझे धैर्य और साधना की सफलता का आशीर्वाद प्रदान करें। इस प्रार्थना के बाद मार्गदर्शक गुरु के निर्देशानुसार संकल्प करके साधना के आसन पर अवस्थित हो शनि प्रतिमा व शनियंत्र को काले वस्त्र का आसन देकर पूजन करें और पूजनोपरांत विधिवत मंत्र जाप प्रारंभ करने के पूर्व साधक को अपने शरीर में सरसों का तेल अवश्य लगा लेना चाहिए। इस साधना में प्रयुक्त होने वाली पूजन सामग्रियों को अपने पास में रखकर जाप प्रारंभ करना चाहिए। शनिवार से प्रारंभ होकर चलने वाली यह साधना 40 दिनों में समाप्त होती है। इसमें प्रतिदिन 108 माला का जाप अति आवश्यक है और जाप के बाद उक्त मंत्र का उच्चारण करते हुए जितने मंत्र जाप हुए हैं, उन मंत्रों का दशांश हवन करना चाहिए और दशांश का मार्जन व मार्जन का तर्पण करना चाहिए। आहुति तिल व तेल से करनी चाहिए। इस साधना में साधक को

केवल दूध या फलों का सेवन संध्याकाल में करना चाहिए तथा ब्रह्मचर्य का पूरा पालन भी आवश्यक है। यह साधना अर्धरात्रि में प्रारंभ की जाती है। मंत्र जाप के दौरान शनि प्रतिमा या शनि यंत्र पर अपनी दृष्टि एकाग्र करनी चाहिये। साधक को शयन भी उसी आसन पर करना चाहिए। साधना के अंतिम दिन अब तक जितने मंत्र जाप हुए हैं, उन मंत्रों का दशांश हवन उसका मार्जन व तर्पण करें। श्रद्धापूर्वक की गई साधना के फलस्वरूप इष्टदेव के दर्शन होते हैं और मनोनुकूल इच्छाएँ भी पूरी होती हैं। साधक को साधना के दौरान अहंकार और भय से रहित रहना चाहिए। भयभीत और अहंकार युक्त हृदय में दर्शनों का आनंद नहीं मिलता। साधना के दौरान अनेकों प्रकार के विचित्र अनुभव भी होने लगते हैं। इसलिए साधक को दृढ़ निश्चय और प्रभु की प्रार्थना के बल पर अडिग बने रहना चाहिए। किसी भी स्थिति में आसन से उठना नहीं चाहिये।

अत: हर स्थिति में जप जारी रखें और शनिदेव को प्रणाम कर अपनी सफलता की कामना को मन ही मन अवश्य दुहराते रहें। 40 दिनों की इस साधना में उक्त मंत्र पूर्ण सिद्ध हो जाता है, जिसके द्वारा साधक अपने साथ दूसरों का कल्याण भी करने में समर्थ हो जाते हैं। तत्पश्चात् किसी भी कार्य की सफलता के लिए मात्र इस मंत्र का 108 बार जाप पर्याप्त होता है। किंतु यदि मोहन, उच्चाटन, वशीकरण, विद्वेषण आदि अभिचार कर्म करना हो तो साधक को उक्त मंत्र का 11 माला अवश्य जाप करना चाहिए और उसका दशांश हवन, मार्जन व तर्पण भी यथाविधि अवश्य करना चाहिए, परंतु किसी अनिष्ट कार्य के लिए सिद्धि नहीं लगानी चाहिए, अन्यथा मंत्र सिद्धि लुप्त हो जायेगी।

प्रमुख शनि साधना मंत्र

सर्वबाधा निवारक वैदिक गायत्री मंत्र–

शनि गायत्री

ॐ भगभवाय विद्महे मृत्युरुपाय धीमहि,
तन्नौ शौरिः प्रचोदयात्।

प्रतिदिन श्रद्धानुसार शनि गायत्री का जाप करने से घर में सदैव मंगलमय वातावरण बना रहता है।

वैदिक शनि मंत्र

ॐ शन्नोदेवीरभिष्टय आपो भवन्तु पीतये
शं योरभिस्रवन्तु नः।।

शनिदेव को प्रसन्न करने का सबसे पवित्र और अनुकूल मंत्र है। इसकी पाँच माला सुबह-शाम करने से शनिदेव की भक्ति व प्रीति मिलती है।

पौराणिक शनि मंत्र

ॐ नीलांजनसमाभासं रविपुत्रं यमाग्रजम्।
छायामार्तण्डसम्भूतं तं नमामि शनैश्चरम्।।

यह बहुत ही सटीक फल देने वाला शनि मंत्र है। इसका यदि सवा करोड़ जाप स्वयं करे या विद्वान साधकों से करवाएं तो जातक राजा के समान सुख प्राप्त करता है।

शनि ग्रह पीड़ा निवारण मंत्र

सूर्यपुत्रो दीर्घ देहो विशालाक्षः शिवप्रियः।
मंदचारः प्रसन्नात्मा पीडां हरतु मे शनिः।।

सूर्योदय के समय, सूर्य दर्शन करते हुए 21 या 7 बार इस मंत्र का

पाठ करना शनि शांति में विशेष उपयोगी होता है।

कष्ट निवारण शनि मंत्र

नीलाम्बरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्।
चर्तुभुजः सूर्यसुतः प्रशान्तः सदाऽस्तुं मह्यं वरदोऽल्पगामी॥

इस मंत्र से अनावश्यक समस्याओं से छुटकारा मिलता है। प्रतिदिन एक माला सुबह शाम करने से शत्रु चाहकर भी नुकसान नहीं पहुँचा पायेगा।

सुख-समृद्धि दायक शनि मंत्र

कोणस्थ पिंगलो बभ्रु कृष्णौ रोद्रान्तको यमः।
सौरिः शनैश्चरो मंदः पिप्पलादेन संस्तुतः॥

इस शनि स्तुति को प्रातःकाल 21 या 7 बार पाठ करने से शनिजनित कष्ट नहीं व्यापते और सारा दिन सुखपूर्वक बीतता है।

किसी शनिवार से आरंभ करके 21 दिनों में शनि के तांत्रिक शनि मंत्र– **ॐ प्रां प्रीं प्रौं सः शनैश्चराय नमः** का 23000 जाप करने से घर में सुख–शांति आती है।

शनि पत्नी नाम स्तुति

ॐ शं शनैश्चराय नमः

ध्वजनि धामिनी चैव कंकाली कलहप्रिया।
कंटकी कलही चाऽथ तुरंगी महिषी अजा॥

ॐ शं शनैश्चराय नमः

यह बहुत ही अद्‌भुत और रहस्यमय स्तुति है। यदि आपको कारोबारी, पारिवारिक या शारीरिक समस्या हो। इस मंत्र का विधिविधान से जाप और अनुष्ठान किया जाये तो कष्ट आपसे कोसों दूर रहेंगे। यदि आप अनुष्ठान न कर सकें तो प्रतिदिन इस मंत्र की एक माला अवश्य करें, घर में सुख–शांति का वातावरण रहेगा।

श्री शनैश्चर स्तोत्र

दशरथकृतस्तोत्र साधना

विनियोग

अस्य श्रीशनैश्चरस्तोत्रस्य दशरथ ऋषिः। शनैश्चरो देवता, त्रिष्टुप छन्दः, शनैश्चरप्रीत्यर्थे पाठे विनियोगः।

कोणाऽन्तकोरौद्रयमोऽथबभ्रुः कृष्णः शनिः पिंगलमन्दसौरीः।
नित्यं स्मृतो यो हरते च पीडां तस्मै नमः श्रीरविनन्दनाय॥१॥
सुराऽसुराः किंपुरुषोनगेन्द्रागन्धर्वविद्याधरपन्नगाश्च।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥२॥
नरानरेन्द्राः पशवोमृगेन्द्रावन्याश्च ये कीटपतंगभृंगा।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥३॥
देशाश्चदुर्गाणिवनानि यत्रसेनानिवेशाः पुरपत्तनानि।
पीडयन्ति सर्वे विषमस्थितेन तस्मै नमः श्रीरविनन्दनाय॥४॥
तिलैर्यवैर्माषगुडान्नदानैर्लोहेन नीलाम्बरदानतो वा।
प्रीणाति मन्त्रैर्निजवासरे च तस्मै नमः श्रीरविनन्दनाय॥५॥
प्रयागकूलेयमुना तटे च सरस्वती पुण्य जले गुहायाम्।
यो योगिनां ध्यानगतोऽपि सूक्ष्म तस्मै नमः श्रीरविनन्दनाय॥६॥
अन्य प्रदेशात्स्वगृहं प्रविष्टस्तदीयवारे स नरः सुखी स्यात्।
गृहाद्गतो यो न पुनः प्रयाति तस्मै नमः श्रीरविनन्दनाय॥७॥
स्त्रष्टास्वयं भूर्भुवनत्रयस्यत्राता हरीशो हरते पिनाकी।
एकस्त्रिधा ऋग्यजुः साममूर्तिस्तस्मै नमः श्रीरविनन्दनाय॥८॥
शन्यष्टकं यः प्रयतः प्रभाते नित्यं सुपुत्रै पशुबान्धवैश्च।

पठेत्तुसौख्यं भुवि भोगयुक्तः प्राप्नोति निर्वाणपदं तदन्ते॥९॥
कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः।
सौरिः शनैश्चरो मन्दः पिप्पलादेन संस्तुतः॥१०॥
एतानि दश नामानि प्रातरुत्थाय यः पठेत्।
शनैश्चरकृता पीडा न कदाचिद्भविष्यति॥११॥

मधुराष्टकम्

अधरं मधुरं वदनं मधुरं नयनं मधुरं हसितं मधुरम्।
हृदयं मधुरं गमनं मधुरं मधुराधिपतेरखिलं मधुरम्॥१॥
वचनं मधुरं चरितं मधुरं वसनं मधुरं वलितं मधुरम्।
चलितं मधुरं भ्रमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥२॥
वेणुर्मधुरो रेणुर्मधुरः पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं मधुराधिपतेरखिलं मधुरम्॥३॥
गीतं मधुरं पीतं मधुरं भुक्तं मधुरं सुप्तं मधुरम्।
रूपं मधुरं तिलकं मधुरं मधुराधिपतेरखिलं मधुरम्॥४॥
करणं मधुरं तरणं मधुरं हरणं मधुरं रमणं मधुरम्।
वमितं मधुरं शमितं मधुरं मधुराधिपतेरखिलं मधुरम्॥५॥
गुञ्जा मधुरा माला मधुरा यमुना मधुरा वीची मधुरा।
सलिलं मधुरं कमलं मधुरं मधुराधिपतेरखिलं मधुरम्॥६॥
गोपी मधुरा लीला मधुरा युक्तं मधुरं मुक्तं मधुरम्।
दृष्टं मधुरं शिष्टं मधुरं मधुराधिपतेरखिलं मधुरम्॥७॥
गोपा मधुरा गावो मधुरा यष्टिर्मधुरा सृष्टिर्मधुरा।
दलितं मधुरं फलितं मधुरं मधुराधिपतेरखिलं मधुरम्॥८॥

॥ इति श्रीमद्वल्लभाचार्यकृतं मधुराष्टकं सम्पूर्णम् ॥

श्री शनिस्तवराजः

संकट निवारण व मनोवांछित फलों की प्राप्ति में विशेष उपयोगी

विनियोग

अस्य श्रीशनैश्चरस्तवराजस्य सिन्धुद्वीपऋषिः। गायत्री छन्दः, आपो देवता, शनैश्चरप्रीत्यर्थे पाठे विनियोगः।

नारद उवाच-
ध्यात्वा गणपतिं राजा धर्मराजो युधिष्ठिरः।
धीरः शनैश्चरस्येमं चकार स्तवमुत्तमम्॥१॥
शिरो मे भास्करिः पातु भालं छायासुतोऽवतु।
कोटराक्षो दृशौ पातु शिखिकण्ठनिभः श्रुती॥२॥
घ्राणं मे भीषणः पातु मुखं वलिमुखोऽवतु।
स्कन्धौ संवर्तकः पातु भुजौ मे भयदोऽवतु॥३॥
सौरिर्मे हृदयं पातु नाभिं शनैश्चरोऽवतु।
ग्रहराजः कटिं पातु सर्वतो रविनन्दनः॥४॥
पादौ मन्दगतिः पातु कृष्णः पात्वखिलं वपुः।
रक्षामेतां पठेन्नित्यं सौरनेमिबलैर्युताम्॥५॥
सुखी पुत्री चिरायुश्च स भवेन्नैव संशयः।
ॐ सौरिः शनैश्चरः कृष्णो नीलोत्पलनिभः शनिः॥६॥
शुष्कोदरो विशालाक्षो दुर्निरीक्ष्यो विभीषणः।
शितिकण्ठनिभो नीलश्चछायाहृदयनन्दनः॥७॥
कालदृष्टिः कोटराक्ष स्थूलरोमा बलीमुखः।

दीर्घो निर्मासंगात्रस्तु शुष्को घोरो भयानकः ॥८॥
नीलांशुः क्रोधनो रौद्रो दीर्घश्मश्रुर्जटाधरः ।
मन्दो मन्दगतिः खञ्जोस्ततश्च संवर्तको यमः ॥९॥
ग्रहराजः कराली च सूर्यपुत्रो रविः शशी ।
कुजो बुधो गुरुः काव्यो भानुजः सिंहिकासुतः ॥१०॥
केतुदेवपतिबार्हुः कृतान्तो नैर्ऋतस्तथा ।
कुशी मरूत्कुबेरश्च ईशानः सुर आत्मभू ॥११॥
विष्णुर्हरो गणपतिः कुमारः काम ईश्वर ।
कर्ता हर्ता पालयिता राज्यभुग् राज्यदायकः ॥१२॥
छायासुतः श्यामलाङ्गो धनहर्ता धनप्रदः ।
क्रूरकर्मविधाता च सर्वकर्माविरोधकः ॥१३॥
तुष्टो रुष्टः कामरूपः कामदो रविनन्दनः ।
ग्रहपीडाहरः शान्तो नक्षत्रेशो ग्रहेश्वरः ॥१४॥
स्थिरासनः स्थिरगतिर्महाकायो महाबलः ।
महाप्रभो महाकालः कालात्मा कालकालकः ॥१५॥
आदित्यः भयदाता च मृत्युरादित्यनन्दनः ।
शतभिद्रुक्षदयिता त्रयोदशितिथिप्रियः ॥१६॥
तिथ्यात्मा तिथिगणनो नक्षत्रगणनायकः ।
योगराशिर्मुहूर्तात्मा कर्ता दिनपतिः प्रभुः ॥१७॥
शमीपुष्पप्रियः श्यामस्त्रैलोक्य भयदायकः ।
नीलवासाः क्रियासिन्धुर्नीलाञ्चयजनच्छविः ॥१८॥
सर्वरोगहरो देवः सिद्धो देवगणस्तुतः ।
अष्टोत्तरशतं नाम्नां सौरेश्छायासुतस्य यः ॥१९॥

पठेन्नित्यं तस्य पीड़ा समस्ता नश्यति ध्रुवम् ।
कृत्वा पूजां पठेन्मर्त्यो भक्तिमान् य स्तवं सदा ॥२०॥
विशेषतः शनिदिने पीड़ा तस्य विनश्यति ।
जन्मलग्ने स्थितिर्वापि गोचरे क्रूरराशिगे ॥२१॥
दशासु च गते सौरेस्तदा स्तवमिमं पठेत् ।
पूजयेद्यः शनिं भक्त्या शमीपुष्पाक्षताम्बरैः ॥२२॥
विधाय लौहप्रतिमां नरो दुःखाद्विमुच्यते ।
बाधाचान्यग्रहाणां च यः पठेतस्य नश्यति ॥२३॥
भीतो भयाद्विमुच्येत बद्धो मुच्येत बन्धनात् ।
रोगी रोगाद्विमुच्येत बद्धो मुच्येत बन्धनात् ॥२४॥
रोगी रोगाद्विमुच्येत बद्धो नरः इमं पठेत् ।
पुत्रबान्धनवान् श्रीमाञ्जायते नात्र संशयः ॥२५॥

नारद उवाच

स्तवं निशम्य पार्थस्य, प्रत्यक्षोऽभूच्छनैश्चरः ।
दत्त्वा राज्ञे वरं, कामं शनिश्चरान्तर्दधे तदा ॥२६॥

प्रस्तुत शनि स्तोत्र का जाप प्रतिदिन करने से शनि की कृपा प्राप्त होती है, ग्रहबाधा शान्त होती है तथा गृह क्लेश मिटता है। मन में श्रद्धा और विश्वास से यदि इस स्तोत्र का जाप प्रतिदिन ग्यारह बार किया जाये तो मनुष्य की सभी मनोकामनायें पूर्ण हो जाती हैं।

मनु हृदय शनिदेव का, प्रेम अजब संजोग।
हँसते जग के लोग सब, कैसा पाला रोग॥
शनैश्चर सुरवन्द्य मन्द, घन स्वरूप विधिरूप।
ये छाया के लाल हैं, विद्या अविद्या स्वरूप॥

श्रीदशरथकृतशनिस्तोत्रम्

विनियोग– **श्री गणेशाय नमः। ॐ अस्य श्री शनिस्तोत्रमन्त्रस्य, कश्यपऋषिस्त्रिष्टुप्छन्दः, सौरिर्देवता, रां बीजम्, निःशक्ति, कृष्णवर्णेति कीलकम्, धमार्थ, काम-मोक्षात्मक-चतुर्विध-पुरुषार्थसिद्धहर्थे जपे विनियोगः।**

अथ न्यासः

करन्यास– **शनैश्चराय अङ्गुष्ठाभ्यां नमः। मन्दगतये तर्जनीभ्यां नमः॥१॥ अधोक्षजाय मध्यमाभ्यां नमः। कृष्णाङ्गाय अनामिकाभ्यां नमः॥२॥ शुष्कोदराय कनिष्ठिकाभ्यां नमः। छायात्मजाय करतलकरपृष्ठाभ्यां नमः॥३॥**

हृदयादिन्यास– **शनैश्चराय हृदयाय नमः। मन्दगतये नमः शिरसे स्वाहा॥ अधोक्षजाय नमः शिखायै वौषठ्। कृष्णाङ्गाय कवचाय हुं। शुष्कोदराय नेत्रत्रयाय वौषट्। छायात्मजाय नमः अस्त्राय फट्॥**

दिग्बन्धनम्– ॐ भूर्भुवः स्वः, इति दिग्बन्धनम्।

(इस मंत्र को 5 बार पढ़कर, सभी दिशाओं में जल छिड़कें)

ध्यानम्

नीलद्युतिं शूलधरं किरीटिनं गृध्रस्थितं त्रासकरं धनुर्धरम्।
चतुर्भुजं सूर्यसुतं प्रशान्तं वन्दे सदाऽभीष्टकरं वरेण्यम्॥१॥

प्रणम्य देवदेवेशं सर्वग्रह निवारणम्।
शनैश्चर प्रसादार्थचिन्तयामास पार्थिवः॥२॥
रघुवंशेषु विख्यातो राजा दशरथः पुरा।
चक्रवर्ती च यज्ञेयः सप्तद्वीपाधिपोऽभवत्॥३॥

कृतिकान्तेशनिंज्ञात्वा दैवज्ञैर्ज्ञापितो हि सः।
रोहिणीं भेदयित्वातु शनिर्यास्यिति साम्प्रतं॥४॥
शकटं मेधमित्युक्तं सुराऽसुरभयङ्करम्।
द्वादशाब्दंतु दुर्भिज्ञे भविष्यति सुदारूणम्॥५॥
एतच्छ्रुत्वातुतद्वाक्यंमन्त्रिभिः सह पार्थिवः।
व्याकुलंचजगद्दृष्टवा पौर जानपदादिकम्॥६॥
ब्रुवन्तिसर्वलोकाश्च भयमेतत्समागतम्।
देशाश्चनगरग्रामाः भयभीता समागताः॥७॥
पप्रच्छ प्रयतोराजा वसिष्ठप्रमुखान् द्विजान्।
समाधानं किमत्राऽस्ति ब्रूहिमे द्विजसत्तमाः॥८॥

वशिष्ठ उवाच

प्रजापत्ये तु नक्षत्रे तस्मिन् भिन्नेकुतः प्रजाः।
अयंयोगोऽध्यवसायश्चब्रह्माशक्रादिभिःसुरैः॥९॥
तदा सञ्चिन्त्य मनसा साहसं परमं ययौ।
समाधाय धनुर्दिव्यं दिव्यायुधसमन्वितं॥१०॥
रथमारुह्य वेगेन गतो नक्षत्रमण्डलम्।
त्रिलक्षयोजनं स्थानं चन्द्रस्योपरिसंस्थितम्॥११॥
रोहिणीपृष्ठमासाद्य स्थितो राजा महाबलः।
रथकेतुकाञ्चने दिव्ये मणिनातद्द्विभूषिते॥१२॥
हंसवर्णहयैर्युक्ते महाकेतु समुच्छ्रिते।
दीप्तमानो महारत्नैः किरीटमुकुटोज्वलैः॥१३॥
व्यराजच्च तदाकाशे द्वितीय इव भास्करः।
आकर्णचापामाकृष्य सहस्रास्त्रं नियोजितं॥१४॥
कृतिकान्तं शनिर्ज्ञात्वा प्रविशतांच रोहिणीम्।

दृष्ट्वा दशरथंचाग्रे तस्थौतु भृकुटामुखः॥१५॥
संहास्त्रास्त्रं शनिर्दृष्टवा सुराऽसुरनिषूदनम्।
प्रहस्य चभयात् सौरिरिदं वचनमब्रवीत्॥१६॥

शनिरुवाच

पौरुषं तव राजेन्द्र! मया दृष्टं न कस्यचित्।
देवासुरामनुष्याश्च सिद्ध-विद्याधरोरगाः॥१७॥
मयाविलोकिताः सर्वेभयं गच्छन्ति तत्क्षणात्।
तुष्टोऽहे तव राजेन्द्र! तपसापौरुषेण च॥१८॥
वरं ब्रूहि प्रदास्यामि स्वेच्छया रघुनन्दन।

दशरथ उवाच

प्रसन्नोयदि मे सौरे! एकश्चास्तु वरः परः॥१९॥
रोहिणीं भेदयित्वा तु न गन्तव्यं कदाचन।
सरितः सागरा यावद्यावच्चन्द्रार्कमेदिनी॥२०॥
याचितं तु महासौरे! नान्यमिच्छाम्यहं परम्।
एवमस्तुशनि प्रोक्तं वरंलब्ध्वा तु शाश्वतम्॥२१॥
प्राप्यैवं तु वरं राजा कृतकृत्योऽभवत्तदा।
पुनरेवाऽब्रवीत्तुष्टो वरं वरय सुब्रत॥२२॥
प्रार्थयामास हृष्टात्मा वरमन्यं शनिं तदा।
नभेत्तव्यं न भेत्तव्यं त्वया भास्करनन्दन॥२३॥
द्वादशाब्दं तुं दुर्भिक्षं न कर्त्तव्यं कदाचन।
कीर्तिरेषामदीयां च त्रैलोक्ये स्थापय प्रभो॥२४॥
एवं वरं तु संप्राप्य हृष्टरोमा स पार्थिवः।
रथोपरिधनुः स्थाप्यभूत्वा चैव कृताञ्जलिः॥२५॥
ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकम्।

राजादशरथः स्तोत्रं सौरेरिदमथाऽकरोत्॥२६॥

दशरथ उवाच

नमः कृष्णाय नीलाय शितिकण्ठनिभाय च।
नमः सुरूपगात्राय स्थूलरोमे नमो नमः॥२७॥
नमोनित्यं क्षुधार्त्ताय अतृप्ताय च वै नमः।
नमः कालाग्निरूपायकृष्णाङ्गाय च वै नमः॥२८॥
नमोदीर्घाय शुष्काय कालदृष्टे नमो नमः।
नमोऽस्तुकोटराक्षाय दुर्भिक्षाय कपालिने॥२९॥
नमो घोराय रौद्राय भीषणाय कपालिने।
नमो मन्दते! रौद्र भानुज! भयदायिने॥३०॥
अधोदृष्टे! नमस्तेऽस्तु संवर्तकभयाय च।
तपसा दग्धदेहाय नित्यं योगरताय च॥३१॥
ज्ञानचक्षुर्नमस्तेतु कश्यपात्मजसूनवे।
तुष्टो ददासिवै राज्यं रूष्टोहरसि तत्क्षणात्॥३२॥
सुर्यपुत्र! नमस्तेऽस्तु सर्वभक्षाय वै नमः।
देवाऽसुर मनुष्याश्च पशु-पक्षि-सरीसृपः॥३३॥
त्वया विलोकिताः सर्वे देवाचाशुव्रजन्तिते।
ब्रह्माशक्रोहरिश्चैव ऋषयः सप्ततारकाः॥३४॥
राज्यभ्रष्टाः पतन्त्येयेत्वयादृष्ट्यावलोकिता।
देशाश्चनगरग्रामा द्वीपाश्चैवतथाद्रुमाः॥३५॥
त्वयाविलोकिता सर्वे विनश्यन्ति समूलतः।
प्रसादं कुरु हे सौरे! वरदो भव भानुज॥३६॥
एवं स्तुतस्तदा सौरिः सः राजो महाबलः।
अब्रवीच्च शनिर्वाक्यं हृष्टरोमा च पार्थिवः॥३७॥

तुष्टोऽहं तव राजेन्द्र! स्तोत्रेणाऽनेन सुव्रत।
एवं वरं दास्यामि यत्ते मनसि वर्तते॥३८॥

दशरथ उवाच

प्रसन्नो यदि मे सौरे! वरं देहि ममेप्सितम्।
अद्य प्रभृतिपिंगाक्ष! पीडादेया न कस्यचित्॥३९॥
प्रसादं कुरू मे सोरे! वरोऽयं मे मयेसिप्तः।

शनिरुवाच

अदेयस्तु वरोयुस्मत् तुष्टोऽहं च ददामि ते॥४०॥
त्वयाप्रोक्तं च मे स्तोत्रं ये पठिष्यन्तिमानवाः।
देवासुर मनुष्याश्चसिद्ध विद्याधरोरगाः॥४१॥
न तेषां बाधते पीडा मत्कृता वै कदाचन।
मृत्यु स्थानचतुर्थेवाजन्मं-व्यय-द्वितीयगे॥४२॥
गोचरे जन्मकाले वा दशास्वन्तर्दशासु च।
यः पठेद् द्वि-त्रिसन्ध्यायां वा शुचिर्भूत्वासमाहितः॥४३॥
न तस्य जायते पीडा कृता वै ममनिश्चितम्।
प्रतिमां लोहजां कृत्वा मम राजन् चतुर्थजाम्॥४४॥
वरदांच धनुः शूल बाणांकितकरांशुभाम्।
अयुतमेकजप्यं च तद्दशांशेन होमतः॥४५॥
कृष्णैस्तिलैः शमीपत्रैघृतनीलपंकजैः।
पायसंशर्करायुक्तं घृतमिश्रं च होमयेत्॥४६॥
ब्राह्मणान् भोजयेत्तत्र स्वशक्त्याघृत पायसैः।
तैले वा तिलराशौ वा प्रत्यक्षं चयथाविधि॥४७॥
पूजनं चैव मन्त्रेण कुकुंमंच विलेपयेत्।
नील्यावाकृष्णतुलसी शमीपत्रादिभिः शुभैः॥४८॥

ददन्मे प्रीतये यस्तुकृष्णवस्त्रादिकं शुभम्।
धेनुवृषभंवाऽपि सवत्सां च पयस्विनीम्॥४९॥
एवं विशेषपूजां यः मद्द्वा कुरूते नृप।
मन्त्र द्वारा विशेषेन स्तोत्रेणानेन पूजयेत्॥५०॥
पूजयित्वा जपेत्स्तोत्रं भूत्वा चैव कृतांजलि।
तस्यपीडां नचैवाहं करिष्यामि कदाचन॥५१॥
रक्षामि सततं तस्य पीडां चान्यग्रहस्यच।
अनेनैव प्रकारेण पीडामुक्तं जगद्भवेत्॥५२॥
वरद्वयं तु सम्प्राप्य राजा दशरथस्तदा।
मत्वा कृतार्थमात्मनं नमस्कृत्य शनैश्चरं॥५३॥
शनैश्चराभ्यनुज्ञातो रथमारूह्य वीर्यवान्।
स्वस्थानं च गतो राजा प्राप्तकामोऽभक्त्तदा॥५४॥
स्वार्थसिद्धिभवाप्याथ विजयी सर्वदाऽभवत्।
कोणस्थः पिङ्गलोवभ्रुः कृष्णोरौद्रान्तको यमः॥५५॥
सौरिः शनैश्चरो मन्दः पिप्पलाश्रयसंस्थितः।
एतानिशनिनामानिजपेदश्वत्थ सन्निधौ॥५६॥
शनैश्चरकृता पीडा न कदापि भविष्यति।
अल्पमृत्युविनाशाय दुःखस्योद्धारणायच॥५७॥
स्नातव्यं तिलतैलेन धान्य माषादिंक तथा।
लौहं देव च विप्राय सुवर्णेन समन्वितम्॥५८॥
उशनिस्तोत्रं पठेद्यस्तु श्रृणुयाद्वा समाहितः।
विजयंचार्थकामंचारोग्यं सुखमवाप्नुयात्॥५९॥

(इति श्रीशनिस्तोत्रं सम्पूर्णम्)

दशरथकृत शनि स्तोत्र

(हिन्दी पद्यांश, भक्त बजरंगकृत)

हे श्यामवर्णवाले, हे नीलकण्ठ वाले।
कालाग्नि रूप वाले, हल्के शरीर वाले,
स्वीकारो नमन मेरे, शनिदेव हम तुम्हारे।
सच्चे सुकर्म वाले हैं, मन से हो तुम हमारे॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हे दाढ़ी-मूंछों वाले, लम्बी जटायें वाले,
हे दीर्घ नेत्र वाले, शुष्कोदरा निराले।
भय आकृति तुम्हारी, सब पापियों को मारे॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हे पुष्ट देहधारी, स्थूल-रोम वाले,
कोटर सुनेत्र वाले, हे बज्र देह वाले।
तुम ही सुयश दिलाते, सौभाग्य के सितारे॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हे घोर रौद्र रूपा, भीषण कपालि भूपा,
हे नमन सर्वभक्षी बलिमुख शनी अनूपा।
हे भक्तों के सहारे, शनि! सब हवाले तेरे॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हे सूर्य-सुत तपस्वी, भास्कर के भय मनस्वी,
हे अधो दृष्टि वाले, हे विश्वमय यशस्वी।
विश्वास श्रद्धा अर्पित सब कुछ तू ही निभाले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

अतितेज खड्गधारी, हे मन्दगति सुप्यारी,
तप-दग्ध-देहधारी, नित योगरत अपारी।
संकट विकट हटा दे, हे महातेज वाले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

नितप्रियसुधा में रत हो, अतृप्ति में निरत हो,
हो पूज्यतम जगत में, अत्यंत करुणा नत हो।
हे ज्ञान नेत्र वाले, पावन प्रकाश वाले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

जिस पर प्रसन्न दृष्टि, वैभव सुयश की वृष्टि,
वह जग का राज्य पाये, सम्राट तक कहाये।
उत्तम स्वभाव वाले, तुमसे तिमिर उजाले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हो वक्र दृष्टि जिसपै, तत्क्षण विनष्ट होता,
मिट जाती राज्यसत्ता, हो के भिखारी रोता।
डूबे न भक्त-नैय्या पतवार दे बचा ले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

हो मूलनाश उनका, दुर्बुद्धि होती जिन पर,
हो देव असुर मानव, हो सिद्ध या विद्याधर।
देकर प्रसन्नता प्रभु अपने चरण लगा ले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

होकर प्रसन्न हे प्रभु! वरदान यही दीजै,
बजरंग भक्त गण को दुनिया में अभय कीजै।
सारे ग्रहों के स्वामी अपना विरद बचा ले॥
स्वीकारो नमन मेरे। स्वीकारो भजन मेरे॥

श्रीशनैश्चरसहस्त्रनामस्तोत्र

विनियोग एवं न्यास

अस्य श्रीशनैश्चरसहस्त्रनामस्तोत्र महामन्त्रस्य। कश्यपऋषिः अनुष्टप्छन्दः। शनैश्चरो देवता। शम् बीजम्। नम शक्तिः। मम् कीलकम्। शनैश्चरप्रसादसिद्धयर्थे जपे विनियोगः।

शनैश्चराय अंगुष्ठाभ्यां नमः। मन्दगतये तर्जनीभ्यां नमः। अधोक्षजाय मध्यमाभ्यां नमः। सौरये अनामिकाभ्यां नमः। शुष्कोदराय कनिष्ठिकाभ्यां नमः। छायात्मजाय करतलकरपृष्ठाभ्यां नमः। शनैश्चराय हृदयाय नमः। मन्दगतये शिरसे स्वाहा। अधोक्षजाय शिखायै वषट्। सौरये कवचाय हुम्। शुष्कोदराय नेत्रत्रयाय वौषट्। छायात्मजाय अस्त्राय फट्। भूर्भुस्वसुवरोमिति दिग्बन्धः।

शनिदेव का ध्यान

**चापासनो गृध्रधरस्तु नीलः प्रत्यङ्मुखः काश्यप गोत्रजातः।
सशूलचापेषु गदाधरोऽव्यात् सौराष्ट्रदेशप्रभवश्च शौरिः॥
नीलाम्बरो नीलवपुः किरीटी गृध्रासनास्थो विकृताननश्च।
केयूरहारादि विभूषितांग स्सदाऽस्तु मे मन्दगतिः प्रसन्नः॥**

शनिसहस्त्रनामस्तोत्रम्

**अमिताभाष्यघहरः अशेषदुरितापहः।
अघोररूपोऽतिदीर्घकायोऽशेषभयानकः ॥१॥
अनन्तोअन्नदाता चाश्वत्थमूलजपे प्रियः।
अतिसम्पत्प्रदोऽमोघः अन्यस्तुत्याप्रकोपितः॥२॥
अपराजितो अद्वितीयः अतितेजोऽभयप्रदाः।**

**अष्टमस्थोऽञ्जननिभः अखिलात्मार्कनन्दनः॥३॥
अतिदारुण अक्षोभयः अप्सरोभिः प्रपूजितः।
अभीष्टफलदोऽरिष्टमथनोऽमरपूजितः ॥४॥
अनुग्राह्यो अप्रमेय पराक्रम विभीषणः।
असाध्ययोगो अखिल दोषघ्नः अपराकृतः॥५॥
अप्रमेयोऽतिसुखदः अमराधिपपूजितः।
अवलोकात् सर्वनाशः अश्वत्थाम द्विरायुधः॥६॥
अपराधसहिष्णुश्च अश्वत्थाम सुपूजितः।
अनन्तपुण्यफलदो अतृप्तोतिबलोपिच॥७॥
अवलोकात् सर्ववन्द्यः अक्षीणकरुणानिधिः।
अविद्यामूलनाशश्च अक्षय्यफलदायकः॥८॥
आनन्दपरिपूर्णश्च आयुष्कारक एवच।
आश्रितेष्टार्थवरदः आधिव्याधिहरोपिच॥९॥
आनन्दमय आनन्दकरौ आयुधधारकः।
आत्मचक्रकाधिकारी च आत्मस्तुत्यपरायणः॥१०॥
आयुष्करो आनुपूर्व्यः आतायत्तजगत्रयः।
आत्मनापजपप्रीतः आत्माधिकफलप्रदः॥११॥
आदित्यसंभवो आर्तिभञ्जनो आत्मरक्षकः।
आपद्बान्धव आनन्दरूपो आयुः प्रदोपिचः॥१२॥
आकर्णपूर्णचापश्च आत्मोदिष्ट द्विजप्रदः।
आनुकूल्यो आत्मरूप प्रतिमादान सुप्रियः॥१३॥
आत्मारामो आदिदेवो आपन्नार्ति विनाशनः।
इन्दिरार्चितपादश्च इन्द्रभोगफलप्रदः॥१४॥
इन्द्रदेवस्वरूपश्च इष्टेष्टवरदायकः।**

इष्टापूर्तिप्रदो इन्दुमनीष्टवरदायकः॥१५॥
इन्दिरारमणः प्रीतः इन्द्रवंशनृपार्चितः।
इहामुत्रेष्टफलदः इन्दिरारमणार्चितः॥१६॥
इंद्रियो ईश्वरप्रीतः ईषणात्रयवर्जितः।
उमास्वरूपउद्बोध्यः उशना उत्सवप्रियः॥१७॥
उमादेव्यर्चनप्रीतः उच्चस्थोच्चफलप्रदः।
उरुप्रकाशो उच्चस्थ योगदः उरुपराक्रमः॥१८॥
ऊर्ध्वलोकादिसञ्चारी ऊर्ध्वलोकादिनायकः।
ऊर्जस्वी ऊनपादश्च ऋकाराक्षरपूजितः॥१९॥
ऋषिप्रोक्त पुराणज्ञः ऋषिभिः परिपूजितः।
ऋग्वेदवन्द्यो ऋग्रूपी ऋजुमार्ग प्रवर्तकः॥२०॥
लुलितोद्धारको लूत भवपाशप्रभञ्जनः।
लूकाररूपकोलब्धर्ममार्गप्रवर्तकः ॥२१॥
एकाधिपत्यसाम्रज्यप्रदो एनौघनाशनः।
एकपाद्येक ऐकोनविंशतिमासभुक्तिदः॥२२॥
एकोनविंशतिवर्षदशो एणांकपूजितः।
ऐश्वर्यफलदो ऐन्द्र ऐरावतसुपूजितः॥२३॥
ओंकार जपसुप्रीतः ओंकार परिपूजितः।
ओंकारबीजो औदार्य हस्तो औन्नत्यदायकः॥२४॥
औदार्यगुण औदार्य शीलो औषधकारकः।
करपंकजसन्नद्धधनुश्च करुणानिधिः॥२५॥
कालः कठिनचित्तश्च कालमेघसमप्रभः।
किरीटी कर्मकृत्कारयिताकालसहोदरः॥२६॥
कालाम्बरः काकवाहः कर्मठः काश्यपान्वयः।

कालचक्रप्रभेदी च कालरूप च कारणः॥२७॥
कारिमूर्तिः कालभर्ता किरीटमकुटोज्चलः।
कार्यकारण कालज्ञः काञ्चनाभरथान्वितः॥२८॥
कालदंष्ट्रः क्रोधरूपः कराली कृष्णकेतनः।
कालात्मा कालकर्ता च कृतान्तः कृष्णगोप्रियः॥२९॥
कालाग्निरुद्ररूपश्च काश्यपात्मजसंभवः।
कृष्णवर्णहयश्चैव कृष्णगोक्षीरसुप्रियः॥३०॥
कृष्णगोघृतसुप्रीतः कृष्णगोदधिषुप्रियः।
कृष्णगावैकचित्तश्च कृष्णगोदानसुप्रियः॥३१॥
कृष्णगोदत्तहृदयः कृष्णगोरक्षणप्रियः।
कृष्णगोग्रासचित्तस्य सर्वपीडानिवारकः॥३२॥
कृष्ण गोदान शान्तस्य सर्वशान्त फलप्रदः।
कृष्णगोस्नान कामस्य गंगास्नान फलप्रदः॥३३॥
कृष्णगोररक्षणस्यागु सर्वाभीष्टफलप्रदः।
कृष्णगावप्रियश्चैव कपिलापुद्युषु प्रियः॥३४॥
कपिलाक्षीरपानस्य सोमपानफलप्रदः।
कपिलादानसुप्रीतः कपिलाज्यहुतप्रियः॥३५॥
कृष्णश्च कृत्तिकान्तस्थः कृष्णगोवत्ससुप्रियः।
कृष्णमाल्यांबरधरः कृष्णवर्णतनूरुहः॥३६॥
कृष्णकेतुः कृशकृष्णदेहः कृष्णांबरप्रियः।
क्रूरचेष्टः क्रूरभाव क्रूरदंष्ट्र कुरूपि च॥३७॥
कमलापति संसेव्यः कमलोद्भवपूजतः।
कामितार्थप्रदः कामधेनु पूजनसुप्रियः॥३८॥
कामधेनुसमाराध्यः कृपायुष विवर्धनः।

कामधेन्वैकचित्तश्च कृपराज सुपूजितः॥३९॥
कामदोग्धा च क्रुद्धश्च कुरु वंशसुपूजितः।
कृष्णाङ्गमहिषीदोग्धा कृष्णेन कृतपूजनः॥४०॥
कृष्णाङ्गमहिषीदानप्रियः कोणस्थ एवच।
कृष्णाङ्गमहिषीदानलोलुपः कामपूजितः॥४१॥
क्रूरावलोनात्सर्वनाशः कृष्णाङ्गदप्रियः।
खद्योतः खण्डनः खड्गधरः खेचरपूजितः॥४२॥
खरांशुतनयश्चैव खगानां पतिवाहनः।
गोसवासक्तहृदयः गोचरस्थानदोषहृत्॥४३॥
गृहराश्याधिपश्चैव गृहराज महाबलः।
गृध्रवाहो गृहपतिः गोचरो गानलोलुपः॥४४॥
घोरो घर्मो घनतमो घर्मी घनकृपान्वितः।
घननीलाम्बरधरो डादिवर्ण सुसंज्ञितः॥४५॥
चक्रवर्तिसमाराध्यः चन्द्रमत्या समर्चितः।
चन्द्रमत्यार्तिहारी च चराचर सुखप्रदः॥४६॥
चतुभुर्जश्चापहस्तः चराचरहितप्रदः।
छायापुत्रः छत्रधरः छायादेवीसुतस्तथा॥४७॥
जयप्रदो जगन्नीलो जपतां सर्वसिद्धि।
जपविध्वस्तविमु खो जंभारिपरिपूजितः॥४८॥
जभांरिवन्द्यो जयदो जगज्जनमनोहरः।
जगत्त्रयप्रकुपितो जगत्त्राणपरायणः॥४९॥
जयो जयप्रदश्चैव जगानम्दकारकः।
ज्योतिश्च ज्योतिषां श्रेष्ठो ज्योतिश्शास्त्र प्रवर्तकः॥५०॥
झर्झरीकृतदेहश्च झल्लरीवाद्यसुप्रियः।

ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः॥५१॥
ज्ञानप्रबोधकश्चैव ज्ञानदृष्टयावलोकितः।
टङ्किताखिललोकश्च टङ्कितैन स्तमोरविः॥५२॥
टङ्कारकश्चैव टिङ्कृतो टाम्भदप्रियः।
ठकारमय सर्वस्वः ठकारकृतपूजितः॥५३॥
डक्कारवाद्यप्रीतिकरः डमड्डमरुकप्रियः।
डम्भरप्रभवो डम्भः डक्कानादप्रियङ्करः॥५४॥
डाकिनी शाकिनी भूत सर्वोपद्रवकारकः।
डाकिनीशाकिनीभूत सर्वोपद्रवनाशकः॥५५॥
ढकाररूपो डाम्भीको णकारजपसुप्रियः।
णकारमयमन्त्रार्थः णकारैकशिरोमणिः॥५६॥
णकारवचनानन्दः णकारकरुणामय।
णकारमय सर्वस्वः णकारैकपरायणः॥५७॥
तर्जनीधृतसमुद्रश्च तपसां फलदायकः।
त्रिविक्रमनुतश्चैव त्रयीमयवपुर्धरः॥५८॥
तपस्वी तपसा दग्धदेहः ताम्राधरसतधा।
त्रिकालवेदितव्यश्च त्रिकालमतितोषितः॥५९॥
तुलोच्चयः त्रासकरः तिलतैलप्रियस्तथा।
तिलान्न सन्तुष्टमनाः तिलदानप्रियस्तथाः॥६०॥
तिलभक्ष्यप्रियश्चैव तिलचूर्णप्रियस्तथा।
तिलखण्डप्रियश्चैव तिलापूपप्रियस्तथा॥६१॥
तिलहोमप्रियश्चैव तापत्रयनिवारकः।
तिलतर्पणसन्तुष्टः तिलतैलान्नतोषितः॥६२॥
तिलैकदत्तहृदयः तेजस्वी तेजसान्निधिः।

तेलसादित्यसङ्काशः तेजोमय वपुर्धरः॥६३॥
तत्वज्ञः तत्वगस्तीव्रः तपोरूपः तपोमयः।
तुष्टिदस्तुष्टिकृत् तीक्ष्णः त्रिमूर्ति त्रिगुणात्मकः॥६४॥
तिलदीपप्रियश्चैव तस्य पीडानिवारकः।
तिलोत्तमामेनकादिनर्तन प्रियएवचः॥६५॥
त्रिभागमष्टवर्गश्च स्थूलरोमा स्थिरस्तथा।
स्थितः स्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः॥६६॥
दशरथार्चितपादश्च दशरथस्तोत्रतोषितः।
दशरथप्रार्थक्लृप्त दुर्भिक्ष विनिवारकः॥६७॥
दशरथ प्रार्थनाक्लृप्त वरद्वय प्रदायकः।
दशरथस्वात्मदर्शी च दशरथाभीष्टदायकः॥६८॥
दोर्भिर्धनुर्धरश्चैव दीर्घश्मश्रुजटाधरः।
दशरथस्तोत्रवरदः दशरथाभीप्सितप्रदः॥६९॥
दशरथस्तोत्रसन्तुष्टः दशरथेन सुपूजितः।
द्वादशष्टजन्मस्थो देवपुङ्गवपूजितः॥७०॥
देवदानवदर्पघ्नो दिनं प्रतिमुनि स्तुत।
द्वादशस्थो द्वादशात्मा सुतो द्वादश नामभृत॥७१॥
द्वितीयस्थो द्वादशार्कसूनुः दैवज्ञपूजितः।
दैवज्ञचित्तवासी च दमयन्त्या सुपूजितः॥७२॥
द्वादशाब्दंतु दुर्भिक्षकारी दुस्स्वप्ननाशनः।
दुराराध्यो दुराधर्षः दमयन्ती वरप्रदः॥७३॥
दुष्टदूरो दुराचार शमनो दोषवर्जितः।
दुस्सहो दोषहन्ता व दुर्लभो दुर्गमस्तथ॥७४॥
दुःखप्रदो दुःखहन्ता दीप्तरन्जित दिङ्भुखः।

दीप्यमान मुखांभोजः दमयत्याशिवप्रदः॥७५॥
दुर्निरोक्षो दृष्टमात्र दैत्यमण्डलनाशकः।
द्विजदानैकनिरतो द्विजाराधनतत्परः॥७६॥
द्विजसर्वार्तिहारी च द्विजराज समर्चितः।
द्विजदानैकचित्तश्च द्विजराज प्रियङ्करः॥७७॥
द्विजो द्विजप्रियश्चैव द्विजराजेष्टदायकः।
द्विजरूपो द्विजश्रेष्ठः दोषदो दुस्सहोपिच॥७८॥
देवादिदेवो देवेशो देवराज सुपूजितः।
देवराजेष्ट वरदो देवराज प्रियङ्करः॥७९॥
देवादिवन्दितो दिव्यतनुर्देवशिखामणिः।
देवगानप्रियश्चैव देवदेशिकपुङ्गवः॥८०॥
द्विजात्मजसमाराध्यः ध्येयो धर्मी धनुर्धरः॥
धनुष्मान् धनदाता च धर्माधर्मविवर्जितः॥८१॥
धर्मरूपो धनुर्दिव्यो धर्मशास्त्रात्मचेतनः।
धर्मराज प्रियकरो धर्मराजस्सुपूजितः॥८२॥
धर्मराजेष्टवरदो धर्माभीष्टफलप्रदः।
नित्यतृप्तस्वभावश्च नित्यकर्मरतस्तथा॥८३॥
निजपीडार्तिहारी च निजभक्तेष्टदायकः।
निर्मांसदेहो नीलश्च निजस्तोत्र बहुप्रियः॥८४॥
नलस्तोत्र प्रियश्चैव नलराजसुपूजितः।
नक्षत्रमण्डलगतो नमतां प्रियकारकः॥८५॥
नित्यार्चितपदाम्भोजो निजाज्ञा परिपालकः।
नवग्रहरो नीलवपुर्नलकरार्चितः॥८६॥
नलप्रियानन्दितश्च नलक्षेत्रेनिवासकः।

नलपाक प्रियश्चैव नलपद्मञ्जनक्षमः॥८७॥
नलसर्वार्तिहारी च नलेनात्मार्थपूजितः।
निपाटवीनिवासश्च नलाभीष्टवरप्रदः॥८८॥
नलतीर्थ सकृत्स्नान सर्वपीडानिवारकः।
नलेशदर्शनस्याशु साम्राज्यपदवीप्रदः॥८९॥
नक्षत्रराश्याधिपश्च नीलध्वजविराजितः।
नित्योगरतश्चैव नवरत्नविभूषितः॥९०॥
नवधा भज्यदेहश्च नवीकृतजगत्त्रयः।
नवग्रहाधिपश्चैव नवाक्षरजपप्रियः॥९१॥
नवात्मा नवचक्रात्मा नवतत्वाधिपस्तथा।
नवोदन प्रियश्चैव नवधान्यप्रियस्तथा॥९२॥
निष्कण्टको निस्पृहश्च निरपेक्षो निरामयः।
नागराजार्चिपदो नागाराजप्रियङ्करः॥९३॥
नागराजेष्टवरदो नागाभरण भूषितः।
नागेन्द्रगान निरतः नानाभरणभूषितः॥९४॥
नवमित्र स्वरूपश्च नानाश्चर्यविधायकः।
नानाद्वीपाधिकर्ता च नानालिपिसमावृतः॥९५॥
नानारूप जगत् स्रष्टा नानारूपजनाश्रयः।
नानालोकाधिपश्चैव नानाभाषाप्रियस्तथा॥९६॥
नानारूपाधिकारी च नवरत्नप्रियस्तथा।
नानाविचित्रवेषाढयः नानाचित्र विधायकः॥९७॥
नीलजीमूतसङ्काशो नीलमेघसमप्रभः।
नीलाञ्जनचयप्रख्यः नीलवस्त्रधरप्रियः॥९८॥
नीचभाषा प्राचरज्ञो नीचे स्वल्पफलप्रदः।

नानागम विधानज्ञो नाननृपसमावृतः॥९९॥
नानावर्णाकृतिश्चैव नानावर्णस्वरार्तवः।
नागलोकान्तवासी च नक्षत्रत्रयसंयुतः॥१००॥
नाभादिलोकसंभूतो नामस्तोत्रबहुप्रियः।
नामपारायणप्रीतो नामर्श्चनवरप्रदः॥१०१॥
नामस्तोत्रैकचित्तश्च नानारोगार्तिभञ्जनः।
नवग्रहसमाराध्यः नवग्रह भयापहः॥१०२॥
नवग्रहसुसंपूज्यो नानावेद सुरक्षकः।
नवग्रहाधिराजश्च नवग्रहजपप्रियः॥१०३॥
नवग्रहमयज्योतिः नवग्रह वरप्रदः।
नवग्रहाणामधिपो नवग्रह सुपीडितः॥१०४॥
नवग्रहाधीश्वरश्च नवमाणिक्यशोभितः।
परमात्मा परब्रह्म परमैश्चर्यकारणः॥१०५॥
प्रपन्नभयहारी च प्रमत्तासुरशिक्षकः।
प्रासहस्तः पङ्गुपादो प्रकाशात्मा प्रतापवान्॥१०६॥
पावनः परिशुद्धात्मा पुत्रपौत्र प्रवर्धनः।
प्रसन्नावत्सर्वसुखदः प्रसन्नेक्षण एवच॥१०७॥
प्रजापत्यः प्रियकरः प्रणतेप्सितराज्यदः।
प्रजानां जीवहेतुश्च प्राणिनां परिपालकः॥१०८॥
प्राणरूपी प्राणधारी प्रजानां हितकारकः।
प्राज्ञः प्रशान्तः प्रज्ञावान् प्रजारक्षणदीक्षितः॥१०९॥
प्रावृषेण्यः प्राणकारी प्रसन्नोत्सववन्दितः।
प्रज्ञानिवासहेतुश्च पुरुषार्थैकसाधनः॥११०॥
प्रजाकरः प्रानुकूल्यः पिङ्गलाक्षः प्रसन्नधीः।

प्रपञ्चात्मा प्रसविता पुराण पुरुषोत्तम॥१११॥
पुराण पुरुषश्चैव पुरुहूतः प्रपञ्चधृत्।
प्रतिष्ठितः प्रीतिकरः प्रियकारी प्रयोजन॥११२॥
प्रीतिमान् प्रवरस्तुत्यः पुरूरवसमर्चितः।
प्रपञ्चकारी पुण्यश्च पुरुहूत समर्चितः॥११३॥
पाण्डवादि सुसंसेव्यः प्रणवः पुरुषार्थदः।
पयोदसमवर्णश्च पाण्डुपुत्रार्तिर्दभञ्जनः॥११४॥
पाण्डुपुत्रेष्टदाता च पाण्डवानां हितङ्करः।
पञ्चपाण्डवपुत्राणां सर्वाभीष्टफलप्रदः॥११५॥
पञ्चपाण्डवपुत्राणां सर्वारिष्ट निवारकः।
पाण्डुपुत्राद्यर्चितश्च पूर्वजश्च प्रपञ्चभृत॥११६॥
परचक्रप्रभेदी च पाण्डवेषु वनप्रदः।
परब्रह्म स्वरूपश्च पराज्ञा परिवर्जितः॥११७॥
परात्परः पाशहन्ता परमाणुः प्रपञ्चकृत्।
पातङ्गी पुरुषाकारः परशंभुसभुद्भवः॥११८॥
प्रसन्नात्सर्वसुखदः प्रपञ्चोद्भवसंभवः।
प्रसन्नः परमोदारः पराहङ्कारभञ्जनः॥११९॥
परः परमकारुण्यः परब्रह्ममयस्तथा।
प्रपन्नभयहारी च प्रणतार्तिहरस्तथा॥१२०॥
प्रसादकृत् प्रपञ्चश्च पराशक्ति समुद्भवः।
प्रदानपावनश्चैव प्रशान्तात्मा प्रभाकरः॥१२१॥
प्रपञ्चात्मा प्रपञ्चोपशमनः पृथिवीपतिः।
परशुराम समाराध्यः परशुरामवरप्रदः॥१२२॥
परशुराम चिरञ्जीविप्रदः परमसावनः।

परमहंसस्वरूपश्च परमहंससुपूजितः॥१२३॥
पञ्चनक्षत्राधिपश्च पञ्चनक्षत्रसेवितः।
प्रपञ्च रक्षितश्चैव प्रपञ्जस्य भयङ्करः॥१२४॥
फलदानप्रियश्चैव फलहस्तः फलप्रदः।
फलाभिषेकप्रियश्च फल्गुनस्य वरप्रदः॥१२५॥
पुटच्छमित पापौघः फल्गुनेन प्रपूजित।
फणिराजप्रियश्चैव पुल्लाम्बुज विलोचनः॥१२६॥
बलिप्रियोबली बभ्रुः ब्रह्मविष्ण्वीश क्लेशकृत्।
ब्रह्मविष्णीशरूपश्च ब्रह्मशक्रादिदुर्लभः॥१२७॥
बासदष्टर्या प्रमेयाङ्गो बिभ्रत्कवचकुण्डलः।
बहुश्रुतो बहुमतिः ब्रह्मण्यो ब्राह्मणप्रियः॥१२८॥
बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः।
बालार्क्द्युतिमान्बाले बृहद्वक्षो बृहत्तमः॥१२९॥
ब्रह्माण्डभेदकृच्चैव भक्तसर्वार्थसाधकः।
भव्यो भोक्ता भीतिकृच्च भक्तानुग्रहकारकः॥१३०॥
भीषणो भैक्षकार च भूसुरादि सुपूजितः।
भोगभाग्यप्रदश्चैव भस्मीकृत जगत्त्रयः॥१३१॥
भयानको भानुसूनुः भूतिभूषित विग्रहः।
भास्वद्रतो भक्तिमतां सुलभो भ्रुकुटीमुखः॥१३२॥
भवभूत गणैस्स्तुत्यो भूतसंघसमावृतः।
भ्राजिष्णुर्भगवान्भीमो भक्ताभीष्टवरप्रदः॥१३३॥
भवभक्तैकचित्तश्च भक्तिगीतस्तवोन्मुखः।
भूतसन्तोषकारी च भक्तानां चित्तशोधक॥१३४॥
भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः।

भूतिदो भूतिकृत् भोज्यो भूतात्मा भुवनेश्वरः॥१३५॥
मन्दो मन्दगतिश्चैव मासमेव प्रपूजितः।
मुचुकुन्द समाराध्यो मुचुकुन्द वरप्रदः॥१३६॥
मुचुकुन्दार्चितपदो महारूपो महायशाः।
महाभोगी महायोगी महाकायो महाप्रभुः॥१३७॥
महेशो महदैश्चर्यो मन्दार कुसुमप्रियः।
महाक्रतुर्महामानी महाधीरो महाजयः॥१३८॥
महावीरो महाशान्तो मण्डलस्थो महाद्युतिः।
महासुतो महोदरो महनीयो महोदयः॥१३९॥
मैथिलीवरदायी च मार्ताण्डस्य द्वितीयजः।
मैथिलीप्रार्थनाक्लप्त दशकण्ठ शिरोपहृतः॥१४०॥
मरामरहराराध्यो महेन्द्रादि सुरार्चितः।
महारथो महावेगो मणिरत्नविभूषितः॥१४१॥
मेषनीचो महाघोरो महासौरिर्मनुप्रियः।
महादीर्घो महाग्रासो महदैवर्श्यदायकः॥१४२॥
महाशुष्को महारौद्रो मुक्तिमार्ग प्रदर्शकः।
मकरकुभ्भाधिपश्चैव मृकण्डुतनयार्चितः॥१४३॥
मन्त्राधिष्ठानरूपश्च मल्लिकाकुसुमप्रियः।
महामन्त्र स्वरूपश्च महायन्त्रस्थितस्तथा॥१४४॥
महाप्रकाशदिव्यात्मा महादेवप्रियस्तथा।
महाबलि समाराध्यो महर्षिगणपूजितः॥१४५॥
मन्दचारी महामायी माषदानप्रियस्तथा।
माषोदन प्रीतचित्तो महाशक्तिर्महागुणः॥१४६॥
यशस्करो योगदाता यज्ञाङ्गोपऽपि युगन्धरः।

योगी योग्यश्च याम्यश्च योगरूपी युगाधिपः॥१४७॥
यज्ञभृद्यजमानश्च योगो योगविदां वरः।
यक्षराक्षसवेताल कुष्माण्डादिप्रपूजितः॥१४८॥
यमप्रत्यधिदेवश्च युगपत् भोगदायकः।
योगप्रियो योगयुक्तो यज्ञरूपो युगान्तकृत्॥१४९॥
रघुवंश समाराध्यो रौद्रौ रौद्राकृतिस्तथा।
रघुनन्दन सल्लापो रघुप्रोक्त जपप्रियः॥१५०॥
रौद्ररूपी रथारूडो राघवेष्ट वरप्रदः।
रथी रौद्राधिकारी च राघवेण समर्चितः॥१५१॥
रोषात्सर्वस्वहारी च राघवेण सुपूजितः।
राशिद्वयाधिपश्चैव रघुभिः परिपूजितः॥१५२॥
राज्यभूपाकरश्चैव राजराजेन्द्र वन्दितः।
रत्नकेयूरभूषाढ्यो रमानन्दनवन्दितः॥१५३॥
रघपौ षसन्तुष्टो रघुस्तोत्रबहुप्रियः।
रघुवंशनृपैः पूज्यो रणन्मञ्जीरनूपुरः॥१५४॥
रविनन्दन राजेन्द्रो रघुवंशप्रियस्तथा।
लोहजप्रतिमादानप्रियो लावण्यविग्रहः॥१५५॥
लोकचूडामणिश्चैव लक्ष्मीवाणीस्तुतिप्रियः।
लोकरक्षो लोकशिक्षो लोकलोचनरञ्जितः॥१५६॥
लोकाध्यक्षो लोकवन्द्यो लक्ष्मणाग्रजपूजतः।
वेदवेद्यो वज्रदेहो वज्राङ्कुशधरस्तथा॥१५७॥
विश्वन्द्यो विरूपाक्षो विमलाङ्गविराजितः।
विश्वस्थो वायसारूढो विशेषसुखकारकः॥१५८॥
विश्वरूपी विश्वगोप्ता विभावसु सुतस्तथा।

विप्रप्रियो विप्ररूपो विप्राराधन तत्परः॥१५९॥
विशालनेत्रो विशिखो विप्रदानबहुप्रियः।
विश्वसृष्टि समुद्भूतो वैश्वानरसमद्युतिः॥१६०॥
विष्णुर्विरिञ्चिर्विश्वेशो विश्वकर्ता विशाम्पतिः।
विराडाधारचक्रस्थो विश्वभुग्विश्वभावनः॥१६१॥
विश्वव्यापारहेतुश्च वक्रक्रूरविवर्जितः।
विश्वोद्भवो विश्वकर्मा विश्वसृष्टि विनायकः॥१६२॥
विश्वोमूलनिवासी च विश्वचित्रविधायकः।
विश्वधारविलासी च व्यासेन कृतपूजितः॥१६३॥
विभीषणेष्टवरदो वाञ्चितार्थप्रदायकः।
विभीषणसमाराध्यो विशेषसुखदायकः॥१६४॥
विषमव्ययाष्ट जन्मस्थोप्येकादशफलप्रदः।
वासवात्मजसुप्रीतो वसुदो वासवार्ञ्चितः॥१६५॥
विश्वत्राणैकनिरतो वाङ्भनोतीविग्रहः।
विराणमन्दिरमूलस्थो वलीमुखसुखप्रदः॥१६६॥
विपाशो विगतातङ्को विकल्पपरिवर्जितः।
वरिष्ठो वरदो वन्द्यो विचित्राङ्गो विरोचनः॥१६७॥
शुष्कोदरः शुक्लवपुः शान्तरूपी शनैश्वर।
शूली शरण्यः शान्तश्च शिवायामप्रियङ्करः॥१६८॥
शिवभक्तिमतां श्रेष्ठः शूलपाणेश्शुचिप्रियः।
श्रुतिस्मृतिपुराणज्ञः श्रुतिजालप्रबोधकः॥१६९॥
श्रुतिपारग संपूज्यः श्रुतिश्रवणलोलुपः।
श्रुत्यन्तर्गतमर्मज्ञः श्रुत्येष्ठवरदायकः॥१७०॥
श्रुतिरूपः श्रुतिप्रीतः श्रुतीस्प्सितफलप्रदः।

श्रुचिश्रुतः शान्तमूर्तिः श्रुतिः श्रवणकीर्तनः॥१७१॥
शमीमूलनिवासी च शमीकृतफलप्रदः।
शमीकृतमहाघोरः शरणागतवत्सलः॥१७२॥
शमीतरुस्वरूपश्च शिवमन्त्रज्ञमुक्तिदः।
शिवागभैकनिलयः शिवमन्त्रजपप्रियः॥१७३॥
शमीपत्रप्रियश्चैव शमीपर्णसमर्चितः।
शतोपनिषदस्तुत्यो शान्त्यादिगुणभूषितः॥१७४॥
शान्त्यादिषड्गुणोपेतः शंखवाद्यप्रियस्तथा।
श्यामरक्तसितज्योतिः शुद्धपञ्चाक्षरप्रियः॥१७५॥
श्रीहालास्यक्षेत्रवासी श्रीमान् शक्तिधरस्तथा।
षोडशद्वयसंपूर्णलक्षणः षण्मुखप्रियः॥१७६॥
षड्गुणैश्वर्यसंयुक्तः षडङ्गावरणोज्वलः।
षडक्षरस्वरूपश्च षट्चक्रोपरि संस्थितः॥१७७॥
षोडशी षोडशान्तश्च षट्छक्तिव्यक्तमूर्तिमान्।
षड्भावरहितश्चैव षड्ङ्गश्रुतिपारगः॥१७८॥
षट्कोणमध्यनिलयः षट्छास्त्रस्मृतिपारगः।
स्वर्णेन्द्रनीलमकुटः सर्वाभीष्टप्रदायकः॥१७९॥
सर्वात्मा सर्वदोषघ्नः सर्वगर्वप्रभञ्जनः।
समस्तलोकाभयदः सर्वदोषाङ्गनाशकः॥१८०॥
समस्तभक्तसुखदः सर्वदोषनिवर्तकः।
सर्वनाशक्षमस्सौम्यः सर्वक्लेशनिवारकः॥१८१॥
सर्वात्मा सर्वदा तुष्टः सर्वपीडानिवारकः।
सर्वरूपी सर्वकर्मा सर्वज्ञः सर्वकारकः॥१८२॥
सुकृती सुलभश्चैव सर्वाभीष्टफलप्रदः।

सूरात्मजस्सदातुष्टः सूर्यवंशप्रदीपनः ।।१८३।।
सप्तद्वीपाधिपश्चैव सुरासुरभयङ्करः ।
सर्वसंक्षोभहार च सर्वलोकहितङ्करः ।।१८४।।
सर्वौदार्यस्वभावश्च सन्तोषात्सकलेष्टदः ।
समस्तऋषिभिस्स्तुत्यः समस्तगणपावृतः ।।१८५।।
समस्तगणसंसेव्यः सर्वारिष्टविनाशनः ।
सर्वसौख्यप्रदाता च सर्वव्याकुलनाशनः ।।१८६।।
सर्वसंक्षोभहारी च सर्वारिष्ट फलप्रदः ।
सर्वव्याधिप्रशमनः सर्वमृत्युनिवारकः ।।१८७।।
सर्वानुकूलकारी च सौन्दर्यमृदुभाषितः ।
सौराष्ट्रदेशोद्भवश्च स्वक्षेत्रेष्टवरप्रदः ।।१८८।।
सोमयाजि समाराध्यः साताभीष्ट वरप्रदः ।
सुखासनोपविष्टश्च सद्यःपीडानिवारकः ।।१८९।।
सौदामनीसन्निभश्च सर्वानुल्लङ्घ्यशासनः ।
सूर्यमण्डलसञ्चारी संहारास्त्रनियोजितः ।।१९०।।
सर्वलोकक्षयकरः सर्वारिष्टविधायकः ।
सर्वव्याकुलकारी च सहस्त्रजपसुप्रियः ।।१९१।।
सुखासनो पविष्टश्च संहारास्त्रप्रदर्शितः ।
सर्वालङ्कारः संयुकतकृशणगोदानसुप्रियः ।।१९२।।
सुप्रसन्नस्सुरश्रेष्ठः सुघोषः सुखदस्सुहृत् ।
सिद्धार्थः सिद्धसङ्कल्पः सर्वज्ञस्सर्वदस्सुखी ।।१९३।।
सुग्रवीस्सुधृतिस्सारस्सुकुमारस्सुलोचन ।
सुव्यक्तस्सच्चिदानन्दः सुवीरस्सुजानाश्रयः ।।१९४।।
हरिश्चन्द्रसमाराध्यो हेयेपादेयवर्जितः ।

हरिश्चन्द्रेष्टवरदो हंसमन्त्रादि संस्तुतः ।।१९५।।
हंसवाह समाराध्यो हंसवाहवरप्रदः ।
हृद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः ।।१९६।।
हिरण्यवर्णोहितकृद्धर्षदो हेमभूषणः ।
हविर्होता हंसगतिर्हंसमन्त्रादिसंस्तुतः ।।१९७।।
हनुमदर्चितपदो हलधृत् पूजितस्सदा ।
क्षेमदः क्षेमकृत्यक्षेम्यः क्षेत्रज्ञः क्षामवर्जितः ।।१९८।।
क्षुद्रघ्नः क्षान्तिदः क्षेमः क्षितिभूषः क्षमाश्रयः ।
क्षमाधरः क्षयद्वारो नाम्नामष्टसहस्त्रकम् ।।१९९।।
वाक्येनैकेन वक्ष्यामि वाञ्चितार्थं प्रयच्छति ।
तस्मात्सर्वप्रयत्नेन नियमेन जपेत्सुधीः ।।२००।।

।।श्रीशनैश्चरसहस्त्रनामस्तोत्रंसम्पूर्णम्।।

तू ही माता पिता मेरा बहन तू भैया है।
मैं सुदामा हूँ तेरा, तू मेरा कन्हैया है।।
तू ही भगतों की लाज का शनि रखैया है।
तू ही गरीबों के भण्डार का भरैया है।।
बड़े-बड़े पापयों के पाप का छुड़ैया है।
'मनु'' मन रात दिन लेता तेरी बलैया है।।

तुम्हीं विश्व रूप मैंने देव जी ये पाया है।
तुम्हीं में कृष्ण शिव सूर्य समाया है।
सभी दुष्टों को तुमने काल बन डराया है।
'मनु' भक्तों की तुमने लाज को बचाया है।।

शनि पूजनम्

आवाहनम्– **ॐ सहस्त्रशीर्षापुरुषः सहस्त्राक्षः सहस्त्रपात।**
सभूमिर्ठ सर्वतस्पृत्वात्यत्ष्ठद्दशाङ्गुलम्।।
सौरि! त्वं समागच्छ मम कल्याणकारक।
पूजां गृहाणमेदेवः पात्रेऽस्मिन् सुस्थिरोभवः।।

हे मेरे कल्याणकारक शनिदेव महाराज! आप यहाँ आकर इस चित्र प्रतिमा या यंत्र में स्थित हों और हमारी पूजा स्वीकार करें।

आसनम्– **ॐ पुरुष एवेदंठ सर्वं यद्भूतं यच्चभाव्यम्।**
उतामृतत्वस्येशानो यदन्नेनातिरोहतिः।।
रम्यैकुसुमैर्दिव्यैरासनं ते विनिर्मितम्।
उपवेशय मन्द! त्वं सफलं पूजनं कुरु।।

अति सुंदर अलौकिक पुष्पों से बनाया गया आसन आपके बैठने के लिए दे रहा हूँ, कृपया पूजन सफल करें।

ध्यानम्– **सौराष्ट्रजातमष्टम्यां पौष्णभं धनुराकृतिम्।**
सूर्यपुत्रं चतुर्वाहुं कृष्णाङ्गं तं शनिं नुमः।।

सौराष्ट्र में अष्टमी तिथि, पुष्य नक्षत्र धनु के समान आकृति युक्त जन्म लिये हुए, कृष्ण वर्ण, चार भुजा धारी हे सूर्यपुत्र शनि आपको नमस्कार है।

पाद्यम्– **एताव्वानस्य महिमातो, ज्यायांश्च पुरुषः पादोऽस्य**
विश्वा भूतानि त्रिपादस्यामृतंदिवि।
रम्यं श्रमहरं वारि गन्धपुष्पाक्षतैर्युतम्।
पाद्यं तुभ्यं प्रयच्छामि गृहाण रविनन्दन।।

चंदन, पुष्प, अक्षतों से मिले हुए, थकावटों को दूरन करने वाला सुंदर

जल आपके पाद्य के लिये अर्पित है। हे रविनन्दन, इसे ग्रहण करें।

अर्घ्यम्– **त्रिपादूर्ध्वं उदैत्पुरुषः पादोस्येहाभवत् पुनः।**
ततो विष्वंव्यक्रामत्साशनानशने‌ऽभिः।।
तिलसर्सप दूर्वाभिः गन्धपुष्पाक्षतैश्च यत्।
शीतलं शोभनमर्घ्यं ते अर्पयामि यमाग्रज।।

पुष्प, चंदन, अक्षत, तिल, सरसों और दूर्वा मिला हुआ अतिशीतल और सुंदर जल आपके अर्घ्य के लिए अर्पित कर रहा हूँ। हे यमाग्रज स्वीकार करें।

मधुपर्कम्– **मधुव्वाताऋतायते मधुक्षरन्ति सिंधवः माध्वीर्णः**
संतोषधीः मधुनक्त मुतोषसो।
मधुपर्कं मयानीतं सितघृतमधुनिर्मितम्।
गृहाणग्रहनाथत्वं सफलंकुरुमे सदा।।

दही, घृत, मधु से युक्त मधुपर्क मैं लाया हूँ। हे ग्रह नाथ, कृपया स्वीकार कर मेरे मनोरथ सफल करें।

पयस्नानम्– **ॐ पयः पृथिव्यां पया ओषधीषु**
पयो दिव्यन्तरिक्षे पयोधाः।
पयस्वतीः प्रदिशः सन्तु मह्मयम्।
इत्यनेन पयः स्नानम्।
पयः सुशोभनं दिव्यं गोसम्भूतं च निर्मलम्।
स्नानार्थं ते प्रयच्छामि सफलं कुरु मे सदा।।

सुंदर, शीतल, आलौकिक गाय का दूध आपके स्नान के लिए समर्पित है। कृपया स्वीकार करें।

दधिस्नानम्– **ॐ दधिक्राव्णोऽकारिषञ्जिणोरश्वस्य व्वाजिनः।**
सुरभिनो मुखाकरत्प्रण आयु षितारिपत।

इति दधिस्नानम्॥

शीतलं स्वादु मधुराम्लं दधि नवनीत निर्मितम्।
मयानीतं तवार्थंहि स्नानं कुरु शनैश्चर॥

मक्खन से युक्त मधुर, शीतल दही आपके स्नान के लिए लाया हूँ। हे शनिश्चर महाराज! कृपया इससे स्नान करें।

घृतस्नानम्– घृतं घृत पावानः पिवतवसांपावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशः आदिशः उदिशः विदिशः दिग्भ्य स्वाहा॥ घृतं स्निग्धं सुधारूपं तुष्टिपुष्टिकरं प्रभो। स्नानीयंते मयानीतं गृहाणकुरु मंगलम्॥

अमृत रूप, पुष्टि और संतोषकारक, कोमल घृत आपके स्नान के लिये लाया हूँ। स्वीकार कर मंगल प्रदान करें।

मधुस्नानम्– मधु व्वाता ऋतायते मधुक्षरन्ति सिन्धवः माघ्वीर्नः सन्त्वोषधीः मधुनक्तमुतोषसो मधुमत्पार्थिवां रजः मधुद्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गांवो भवन्तु नः। मधुमाक्षिकसम्भूतं मधुरंपुष्टिवर्धनम्। स्नानार्थं ते मयादत्तमङ्गीकुरुमुदान्वित॥

मधुमक्खियों से उत्पन्न मीठा, पुष्टिवर्धक मधु स्नान के लिए अर्पित है। कृपया स्वीकार करें।

शर्करास्नानम्– ॐ अपा रसमुद्वस्यस सूर्ये सन्त समाहितम्। अपा रसस्य यो रसस्तं वो गृहणाम्युतममुपयाम गृहीतोसिन्द्राय त्वा जुष्टं गृहणाम्ये एषते योनिरिन्द्रायत्वा जुष्टतमम्।

इक्षुरससमुद्रभूता शर्करा मधुराप्रिया।
ग्रहनाथ प्रसन्नार्थं स्नानार्थं प्रतिगृह्यताम्॥

गन्ने के रस से बनी हुई मीठी और प्रिय शक्कर आपकी प्रसन्नता के लिए उपस्थित है। कृपया स्नान के लिए स्वीकार करें।

पंचामृतस्नानम्– ॐ पंच्चनद्यः सरस्वती मपयंति सस्त्रोतसः सरस्वती तु पंचधासो देशे भवत् सरित्। पयोदधिघृतंगव्यं माक्षिकं शर्करानिव्तं। पंचामृतं मयानीतं स्नानार्थं प्रतिगृहताम्॥

दूध, दही, घृत, मधु और शक्कर से बना पंचामृत सेवार्पित है। कृपया स्नान करें।

शुद्धोदकस्नानम्– ॐ शुद्ध बालः सर्व शुद्धबालो मणिबालस्त आश्विनः। श्येत श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्णायामा अवलिप्ता रौद्रा नभौ रूपापार्जन्याः।
शुद्धोदकं शीतलं च निर्मलं गंध संयुतम्।
गंगादि सर्वतीर्थेभ्यो स्नानीयं ते समर्पितम्॥

ॐ शं शनैश्चराय नमः– 5 बार उच्चारण करें।

शीतल, स्वच्छ, चंदनयुक्त गंगा और तीर्थों का जल शुद्धोदक स्नान के लिए समर्पित है।

गन्धोदकस्नानम्– श्रीखण्ड केसरयुतं रम्यं वारिसशीतलम्। गन्धोदकं मयानीतं गृहाणग्रहनायक॥

हे ग्रह नायक, श्रीखण्ड चंदन, केसर युक्त स्वच्छ, शीतल, गन्धोदक मैं लाया हूँ। कृपया ग्रहण करें।

आचमनीयम्– ॐ आचम्यतां मयानीतं सुस्वादु निर्मलं जलम्।

पिंगलायनमस्तुभ्यं गृहाणाचमनीयकम्॥
हे पिंगल! स्वादिष्ट, निर्मल, शीतल जल आपके आचमन के लिए उपस्थित है, ग्रहण करें।

वस्त्रम्– **युवासुवासा परिवीत आगात्, सउश्रेयान् भवति जायमानः। तन्धीराशः कवयउन्वन्ति स्वाध्यो मनसा देवयन्तः॥**
क्षेमपट्ट विनिर्मीतं स्निग्धंचारु सुकोमलम्। वस्त्रं ददामि ते कृष्ण गृहाण मुदयान्वित॥
हे कृष्ण! रेशम निर्मित स्निग्ध, सुंदर कोमल वस्त्र दे रहा हूँ। प्रसन्नतापूर्वक ग्रहण करें।

ततः आचमनीयम्– फिर अनुष्ठान कर्ता शनिदेव को आचमनीय समर्पित करें।

यज्ञोपवीतम्– **ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवःसुबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च व्विवः।**
यज्ञोपवीतम् शुद्धं पवित्रं परमं शुभम्। अर्पयामि प्रभो गृह्य सफलं कुरु मनोरथम्॥
हे प्रभो, शुद्ध पवित्र, सुंदर, यज्ञोपवीत अर्पित कर रहा हूँ। स्वीकार कर हमारा मनोरथ सफल करें।

ततः आचमनीयम्– फिर अनुष्ठानकर्ता शनिदेव को आचमनीय समर्पित करें।

